Substance:—Character, Devanāgarī. White paper. Lines, 16 on a page. Letters, 58 in a line. Folia, 28. $12\frac{1}{4} \times 6\frac{1}{4}$ inches, Appearance, old. Prose. Complete. Incorrect. Date? Place of deposit, Pandit Rādhākānta Jhā, Mahesapur, P. O. Tājpur, Darbhanga. A commentary on the Kaṭhopanisadbhāsya of Śaṅkarāchārya. Anonymous.

Beginning:—उशन्ह वै वाजश्रवसः सर्ववेदसन्ददौ तस्य ह नचिकेता नाम पुत्र आस त ७ ह कुमर ७ संतं दक्षिणासु नीयमानासु श्रद्धाविवेश सोमन्यत् ।
पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः ।
अनन्दा नाम ते लोका तान्स गच्छति ता ददत् ॥

Beginning of Bhāṣya:—ओं नमो भगवते वैवस्वताय मृत्यवे ब्रह्मविद्याचार्याय नचिकेतसे च ॥ अथ काठकोपनिषद्वल्लीनां सुखार्थप्रबोधनार्थमल्पग्रन्थावृत्तिरारभ्यते। सदेर्धातोर्विशरणगत्यवसादनार्थस्य उपनिपूर्वस्य क्विप्रत्ययान्तस्य रूपमुपनिषदिति। उपनिषच्छब्देन व्याचिख्यासितग्रन्थप्रतिपाद्यवेद्यवस्तुविषया विद्योच्यते ॥

Beginning of Commentary on Bhāsya :—ओं श्रीगणेशाय नमः ॥

ओं धर्माधर्माद्यसंस्पृष्टं कार्यकारणवर्जितम् ।

कालादिभिरवच्छिन्नं ब्रह्म यत्तन्नमाम्यहम् ॥

यः साक्षात्कृतपरमानन्दो यावदधिकारं मान्ये पदे वर्त्तमानोऽकर्तृ-ब्रह्मात्मानुभवबलतो भूतयातनानिमित्तदोषैरलिप्तस्वभाव आचार्यो वरप्रदानेन परब्रह्मात्मैक्यविद्यामुपदिदेश यस्मै चोपदिदेश ताभ्यां नमस्कुर्वन्नाचार्यभक्तेर्विद्याप्राप्त्यंगत्वं दर्शयति नमो भगवते वैवस्वतायेति ॥

End of Text :—मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् ।

ब्रह्मप्राप्तो विरजोभूद्विमृत्युरन्योप्येवं यो विदध्यात्ममेव ॥

सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।

तेजस्विनावधीतमस्तु मा विद्विषावहै ओं शान्तिः शान्तिः शान्तिः ॥

End of Bhāsya:—मा विद्विषावहै शिष्याचार्यावन्योन्यं प्रमादकृतान्यायाध्ययनाध्यापनदोषनिमित्तद्वेषं मा करवावहै । शान्तिरिति त्रिवचनं सर्वदोषोपशमनार्थं ओमिति समाप्त्यर्थः ॥

End of Commentary on Bāshya :—आत्मानं देहमधिकृत्य वर्त्तत इत्यध्यात्मं प्रत्यक्स्वरूपमेव ब्रह्म प्राप्य विमृत्युर्भवति नान्यद्रूपमर्चिरादिमार्गगम्यं प्राप्य संयोगस्य वियोगावसानत्वादित्यर्थः । एवं शब्दस्य विशब्देन सह संबन्धः । एवं विदिति ॥

Colophon :— इति श्रीयजुर्वेदे काठकोपनिषदि षष्ठी वल्ली समाप्ता ॥ द्वितीयोध्यायः समाप्तः ॥

Colophon of Bhāsya :—इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशंकरभगवतः कृतौ कठोपनिषद्भाष्ये षष्ठी वल्ली समाप्तः ॥

Colophon of Commentary on Bhāsya :—इति श्रीशाङ्करस्य काठको-
पनिषद्भाष्यस्य टीका समाप्ता ॥ श्रीरामजी ॥

विषय: । कठोपनिषद्भाष्यव्याख्यानम् ॥

Previous Notice:—C. C. Pt. I. P. 89. Pt. II. P. 17. 192. Pt. III. P. 19. Ady. P. 154. C. P. B. P. 70. H. P. S. P. 449. B. S. C. P. 680. 643. 663. Tan. Vol. III. P. 950—54.

(A) कठोपनिषद्भाष्यविवरणम् ॥ Kaṭhopanisadbhāsyavivaraṇam.

Substance:—Character, Devanāgarī. White paper. Lines, 9 on a page. Letters, 48 in a line. Folia, 12. 13×5 inches. Appearance, fair. Prose. Complete. Generally correct. Date? Place of deposit, Pandit Bhaie Pāṭhaka, Karion, P. O. Ballīpur, Darbhanga. A commentary on Kaṭhopanisat by Śaṅkarāchārya.

Beginning, End, Colophon, विषय:—Same.

No. 25. कण्वशाखीयोपनिषत्काण्डम् ॥ Kaṇvaśākhīyopanisatkāṇdam.

Substance:—Character, Devanāgarī. White paper. Lines, 11 on a page. Letters, 28 in a line. Folia, 20. 11×95 inches. Appearance, old. Damaged. Prose (Hymns). Incomplete. Incorrect. Date, Wanting. Place of deposit, Pandit Vāsudeva Jhā, Chanaur, P. O. Manigachi, Darbhanga.

Beginning:—श्रीगणेशाय नमः ॥ ओंश्वेतकेतुर्हारुणेय आस त ͜ ह पितोवाच श्वेतकेतो वस ब्रह्मचर्य्यं न वै सोम्यास्मत्कुलीनोननूच्यब्रह्मबन्धुरिव भवतीति सह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्ध एवाप तं ह पितोवाच श्वेतकेतो

यत्र सोम्येदं महामना अनूचानमानी स्तब्धोस्युततमादेशमप्राक्ष्यो
येनाश्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ॥

End :— सससित्यापि पुनरेयाय त ७ ह प्रजापतिरुवाच मघवन्यच्छान्त-
हृदय: प्राव्राजी: किमिच्छं पुनरागम इति स होवाच तद्यपीदं भगव:
शरीरमन्धं भवत्यनन्ध: स भवति यदि स्राममस्रामो नैवैपोस्य दोषेण
दुष्यति न वधेनास्य हन्यते न'स्य स्राम्येण स्रामी घ्नन्ति त्वेवैनं
विच्छादयन्ती वा प्रियवेत्तेव भवत्यपि रोदितीव नाहमत्र भोग्यं पश्या-
मीत्येवमेवैप मघवन्निति होवाचैतं त्वेव ते भूयो न व्याख्यास्यामि
वसापराणि द्वात्रि ७ शतं वर्षाणीति रुहा१श· · · · · · · · · · · · ·
स तस्मै होवाच ॥ १० ॥

Colophon :—Wanting.

विषय: । आत्मविचार: ।

Previous Notice :—C. C. Pt. I. P. 78. (?)

No. 26. कण्वशाखीयोपनिषत्काण्डम् ॥ Kaṇvaśākīyopaniṣat kāṇḍam.

Substance:—Character, Devanāgarī. White paper. Lines, 11 on a page. Letters, 28 in a line. Folia, 11. 11×5 inches. Appearance, old. Prose (Hymns). Complete. Incorrect. Date? Place of deposit, Pandit Vāsudeva Jhā, Chanaur, P. O Manigachi, Darbhanga.

Beginning :—श्रीगणेशाय नम: ॥ हरि: ॥ ओं यो ह वै ज्येष्ठं च श्रेष्ठं च
वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च
स्वानां भवत्यपि च येषां बुभूषति य एवं वेद ॥ १ ॥ यो ह वै
वसिष्ठां वेद वसिष्ठ: स्वानां भवति वाग्वै वसिष्ठावसिष्ठ: स्वानां

भवत्यपि च येषां बुभूषति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद ॥ ३ ॥

End :— विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभुब्रह्मणे नमः ॥ षष्ठं ब्राह्मणं ॥ ६ ॥

Colophon :— इति श्री काण्वशाखीयोपनिषत्काण्डे द्वितीयोऽध्यायः ॥ २ ॥

विषयः । आत्मविचारः ।

No. 27. कातीयगृह्यकारिका by रेणुक ॥ Kātīyagṛhyakārikā.

Substance :—Character, Devanāgarī. Dark-white paper. Lines, 16 on a page. Letters, 49 in a line. Folia, 76. 11×4½ inches. Appearance, old. Verse. Complete. Correct. Date, Śaka 1349. Worn out. Letters affected. Place of deposit, Pandit Dāmodara Singh Ṭhākur, Bhaur, P. O. Lohat, Darbhanga.

Beginning :— श्री गणेशाय नमः ॥

विघ्नारातिः प्रराजत्कठिनपृथुतरो दण्डकाष्ठाग्रिमाल्ये
निर्गच्छद्रक्तधाराविरचितपरशुर्बुद्धिवृद्धिक्रियाम्रः ।
रक्षद्द्वैमातुरोयं मधुकरनिकरराजितो दण्डतुण्ड-
श्चञ्चच्चामीकराभोऽप्यतितरदुरितश्छेदकः सन्ततं सः ॥
नित्यं वैरिप्रशान्त्यै नमदमरजसच्छेखरावद्धराज-
न्मान्दारोद्भूतपुष्पावलिरचितपदाम्भोजयुग्माम्बिकायाः ।
देवेन्द्राम्भोजयोनिप्रमथिहरिचमूदुर्जयः सौनिभाख्यो
दैत्यो यच्छातशूलाहननिपतितः सास्तु नित्यं श्रिये नः ॥
कर्के कात्यायनाख्यं गणपतिचरणाम्भोजयुग्मं च वाण्याः
पादाम्भोजं प्रणम्य द्विजवरनिकराद्व्यब्जरेणुप्रसादात् ।

गृह्योक्तस्मार्त्तकर्मण्यभिरतमनसां दीपवद्दर्त्तमानां
कातीयैगृह्यसूत्रैर्विरचयति शुभां कारिकां रेणुकाख्यः ॥
स्वाभिप्रायेण हि मया न किञ्चिदिह लिख्यते ।
किन्तु वाचनिकं सर्वमतो ग्राह्यैव निर्भयैः ॥

End :— इति तत्त्वार्थसंपूर्णा रेणुकार्येण यज्वना ।
कृतायां सूत्रविवृतौ समाप्ता गृह्यकारिका ॥
अब्दे चयाख्ये मधुसंज्ञमासिकेष्टाष्टवस्त्रीश्वरसम्मिताङ्के ।
ग्रन्थः कृतोयं कमलालयाङ्घ्रिसरोरुहामोदितषट्पदेन ॥
यद्दुरुक्तमनुक्त्वा यच्चोक्तमसमञ्जसम् ।
तदत्र निपुणैः सम्यग्विधातव्यं समञ्जसम् ॥

Colophon :— समाप्ता चेयं रेणुकारिका ॥

Post-Colophon :—संवत् १४८४ शाके १३४९ समये षष्ठ्यादयोर्मध्ये आनन्द नाम सम्वत्सरे ॥ इत्यावसथिकानुर्वीधरात्मजेन कालिदासेन व्यलेखि ॥ ६ ॥ शुभमस्तु लेखकपाठकयोः ॥

विषयः ॥ गर्भाधानान्त्येष्ट्यादिक्रियाविधानं निरूपितम् ॥

Previous Notice :—C. C. Pt. I. P. 534, 334. H. P. S. Cat. P. 937. Tri. Cat. Vol. III. Pt. I. B. P. 3335. (differs in reference).

No. 28. कात्यायनशुल्वसूत्रभाष्यम् by गंगाधर ॥
Kātyāyanaśulvasūtrabhāsyam.

Substance :—Character, Devanāgarī. White paper, Lines, 11 on a page. Folia, 54. 13×5½ inches. Appearance, new. Prose. Complete. Generally correct. Date? Place of deposit, Pandit Bachchā Jhā, Nabani, P. O. Tamuria, Darbhanga.

Beginning :—श्रीगुरुगणपतिशारदाभ्यो नमः ॥

जयत्येको जगत्यां श्रीहरिशंकरदीक्षितः ।
त्रयीसारविवेकृच्छ्रीरामचन्द्रगुरोर्गुरुः ॥
रामचन्द्र गुरुं नत्वा गर्गकर्कादियाज्ञिकान् ।
श्रीकात्यायनशुल्वस्य कुर्वे भाष्यमिमं स्फुटम् ॥
रज्जुसमासं वक्ष्यामः ॥

End :—

इदानीं ग्रन्थसमाप्तिगतः श्लोक उच्यते ।
सूत्रदोषदरिद्रस्य गूढमन्त्रमधीयतः ।
समाप्तेयं क्रियाशाल्विकात्यायनमहात्मनः ॥
कात्यायनमहात्मन इति निगदव्याख्यानं । द्विरभ्यासश्च ग्रन्थ-समाप्तिप्रज्ञप्त्यर्थः । इति शुल्वभाष्ये सप्तमीकण्डिका ॥
रामचन्द्रतनूजेन (श्री) गंगाधरशर्म्मभिः ।
पितृचरणैः सूत्रेऽस्मिन् कातीये शुल्वसंज्ञके ।
विवृत्तिं यत्नतः शिष्टं तदिह विवृतं मया ॥
गङ्गाधरतनूजेन रामकृष्णेन धीमता ।
नागरज्ञातिसंज्ञेन काशीपुरनिवासिना ॥
याज्ञिकास्तेन तुष्यन्तु प्रीयतां यज्ञभुक् विभुः ।
यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव केवलम् ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि ॥

Colophon :— इति श्रीमन्महायाज्ञिकपाठकश्रीरामचन्द्रसूरिसूनुमहायाज्ञिक-पाठकश्रीगंगाधरकृते कात्यायनशुल्वभाष्यं समाप्तिमफाणीदिति शिवम् ॥

विषयः । शुल्वसूत्रभाष्यम् ॥

Previous Notice :—C. C Pt. I. P. 659, 91. Pt. II. P. 280. C P. B. P. 525. H. P. S Cat No. 973.

No. 29. कात्यायनसूत्रपद्धतिः by याज्ञिकदेव ॥ Kātyāyanasūtrapaddhatiḥ.

Substance:—Character, Devanāgarī. Yellow Nepalī paper. Lines, 11 on a page. Letters, 36 in a line. Folia, 94. 12×6½ inches. Appearance, fresh. Prose. Complete. Correct. Date? Place of deposit, Pandit Dāmodra Jhā, Sahapur, P. O. Pandaul, Darbhanga. A work on Kātyāyanasūtra by Yājñikadeva dealing with Yajña.

Beginning:—श्री गणेशाय नमः ॥ अथात्यग्निष्टोमो लिख्यते ॥ तत्र हिरण्य-
शतगवदक्षिणेन वासोश्वदक्षिणेन चतुष्टोमेन रथंतरपृष्ठेनात्यग्निष्टोम-
संस्थेन ज्योतिष्टोमेन हि यक्षये इति वरणे । सर्वमत्राग्निष्टोमवत्
सुत्यायां विशेष. ॥ पात्रयोजने खादिरं चतुरस्रं षोडशपात्रमधिकं ।
ऋतुकरणमाग्निष्टोमिकं आग्नेयसवनीयएकादशिनी वा सोमं मातिरीरिच इत्येव प्रैषः । प्रभावतिउक्थादिषु सूत्रात् अस्य चोक्थात्पूर्वं निर्दिष्टत्वात् ॥

End:— एतेष्वध्वर्युमनुविदधीत तदुक्तं कुर्य्यात् आत्मीयमुपदिष्टमप्युपेक्षयेत यजमानः । आध्वर्यव त्वादस्येति शांखायनभाष्ये । तेन मैत्रावरुण्यायाः पयस्याया उपांशुत्वे देवमूहविषां क्रमश्चाध्वर्युसूत्रादवगन्तव्यः ॥

Colophon:— इति त्रिरग्निचित्संम्राट्स्थपतिमहायाज्ञिकप्रजापतिसुतेन याज्ञिकश्रीदेवेन कृतायां कात्यायनसूत्रपद्धतावष्टादशाध्यायः समाप्तः ॥ ६ ॥
श्रीनृसिंहार्पणमस्तु ॥ ६ ॥ ६ ॥ हरिहराभ्यान्नमः ॥ ६ ॥
श्री विश्वेश्वर प्रसन्नोस्तु ॥ ६ ॥ ६ ॥ वाञ्छासिद्धिरस्तु ॥

विषयः । कात्यायनसूत्रानुसारीयपद्धतौ अग्निष्टोमशतरुद्रियपुरश्चरणाङ्गभूतहोमसोमयज्ञादिविधिपथः प्रदर्शितः शुक्लयजुर्वेदानुसारेण ॥

Previous Notice:—C. C. Pt. I. P. 17, Pt. II. P. 192. Pt. III. P. 20. R. M. Pt. II. P. 88, 185. Tri. Cat. Vol. III. Pt. I. A. P. 3186 Pt. I. B., P. 3245, 3262. D. C. P. 194. H. P. S. Cat. No. 1041—52.

No. 30. कुण्डमण्डपसिद्धिः by विट्ठलदीक्षित ॥ Kuṇḍamaṇḍapasiddhiḥ.

Substance:—Character, Maithılī. White paper. Lines, 8 on a page. Letters, 32 in a line. Folia, 7. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Appearance, new. Incomplete. Verse. Generally correct. Date? Place of deposit, Pandit Bıkala Jhā, Lalaganj, P. O. Jhanjharpur, Darbhanga.

Beginning:—श्रीगणेशाय नमः ॥

गाढध्वान्तमनेकभानुजठरे राजत्कलाधारिणी
प्रोदञ्चच्छफरीयुगन्दरदलत्पद्मे शुद्धीरावलिः ।
स्वर्गोत्तुङ्गगिरिद्वयाधरचरी दीना कलिन्दात्मजा
पश्याश्चर्यमिदं शिवामिति वदन्स्मेरः शिवः पातु वः ॥
कृष्णात्रिगोत्रे नितरां पवित्रकर्मा जनि बूवशर्मा ।
तत्सूनुना विट्ठलदीक्षितेन विरच्यते मण्डपकुण्डसिद्धिः ॥

End:— Wanting.

Colophon:— Wanting.

विषयः । कुण्डमण्डपनिर्माणप्रकारः प्रदर्शितः ॥

Previous Notice:—C. C. Pt. III. P. 24. R. M. Pt. X. P. 226 H. P. S. Cat. No. 1103. B. S. C. 101-118.

No. 31. कुण्डमण्डपसिद्धिव्याख्या by विट्ठलदीक्षित ॥
Kuṇḍamaṇḍapasiddhivyākhyā.

Substance:—Character, Devanāgarī. White paper. Lines, 7 on a page. Letters, 40 in a line. Folia, 33. 10×3¾ inches. Appearance, old. Prose and verse. Complete. Incorrect. Date, Śaka 1739 and Saṁvat 1874. Place of deposit, Pandit Satyadeva Jhā, Nikasi, P. O. Pindaruch, Darbhanga. Worn out Letters affected. Very much damaged. A commentary on his own kuṇḍamaṇḍapasiddhi by Viṭṭhala Dīkṣita.

Beginning:—श्रीगणेशाय नमः ॥

मत्तमतङ्गजवदनं सादितविघ्नावलीसदनम् ॥
गौरीहरयोस्तोकं पालितलोकं हृदावलम्बे ॥१॥
कल्याणि वाणि निजपाणिसरोजयुग्म
संयोज्य देवि करवाणि तव प्रणामम् ।
मत्तुण्डमण्डललसद्रसनाङ्गनान्ते .
नृत्याय नित्यमिदमस्तु रसानुसिक्तम् ॥२॥
संतानकल्पतरुमण्डपमण्डितायां कुण्डोल्लसज्ज्वलनकाञ्चनवेदिकायाम्
सीतारघूद्वहकराकलितैकपाणिर्वैवाहहोमसमये दिशतां शुभानि ॥३॥
कुण्डमण्डपसंसिद्धेर्विवृत्तिं लिखितोऽस्म्यहं ।
प्राचीनवाक्यसंदर्भं संदर्शयितुमारभे ॥४॥
इह हि शिष्टा ग्रन्थारम्भे स्वेष्टदेवतानमस्कारादिरूपं मङ्गलमाचरन्ति
तस्मान्माध्यन्दिनीयो विट्ठलशर्मा स्वकृतमण्डपकुण्डसिद्धिं व्याचि-
ख्यासुः स्वाभीष्टदेवतास्मरणरूपं मङ्गलमाचरति शार्दूलविक्रीडितेनाह ।
गाढं ध्वान्तमनेकभानुजठरे राजत्कलाधारिणी
प्रोदञ्चच्छफरीयुगं दरदलत्पद्मे शुहीरावलिः ।
स्वर्णोत्तुङ्गगिरिद्वयाधरचरी दीना कलिन्दात्मजा
पश्याश्चर्यमिदं शिवामिति वदन् स्मेरः शिवः पातु वः ॥

End :— अथ कृतिदिवसमाह ।

शशियुगतिथिगण्ये याति शाके वरेण्ये

विभवशरदि रम्ये माति शस्ये तपस्ये ।

शशधरभृतिदक्षे मुख्यपक्षे वलक्षे

कमलनयनतिथ्यां भानुमद्वारवत्याम् ॥

व्यधत्तेति पूर्वश्लोकेनान्वयः ।

ग्रन्थे परोक्ते मम दूषणोक्त्या किं वा गुणोक्त्या विदुषा विचार्य

ग्रन्थे मदुक्ते ऽदसद्विशोध्यं सर्वस्तु सर्वं न हि वेद कश्चित् ॥

अङ्गीक र्या मत्कृतिर्निस्तुषेयं कस्मादेदं पण्डितान्प्रार्थयेहम् ।

क्षीरं पेयं नीरमेतद्विहाय को वा विज्ञं हंसमज्ञोऽर्थयेत ॥

Colophon :— इतिसंगमनेरस्थविट्ठलदीक्षितविरचिता स्वकृतमण्डपकुण्डसिद्धिव्याख्या समाप्ता ॥ संवत् १८७४ शाके १७३९ भाद्रवदि ७ वुधेकः समाप्तः ॥

विषयः । मण्डपकुण्डसिद्धिव्याख्यानम् ।

Previous Notice:—C. C. Pt. I. P. 109, Pt. II. P. 22. Pt. III. P. 24. C. P. B. P. 89. H P. S. Cat. No. 1103. B. S. C. P. 101, 118.

(A) कुण्डमण्डपसिद्धिव्याख्या by विट्ठलदीक्षित ॥
Kuṇḍamaṇḍapasiddhivyākhyā.

Substance ·—Character, Devanāgarī. White paper. Lines, 12 on a page. Letters, 40 in a line. Folia, 25. 11×5½ inches Appearance, fair. Prose and verse. Complete. Incorrect. Date, Saṁvat 1923. Place of deposit, Babu Buchana Ṭhākura, Karnpur, P. O. Sukpur, Bhagalpur. A commentary on Kuṇḍamaṇḍapasiddhi by the author himself.

Beginning, End, Colophon and विषय.—Same.

(B) कुण्डमण्डपसिद्धिव्याख्या by विट्ठलदीक्षित ॥
Kuṇḍamaṇḍapasiddhivyākhyā.

Substance :—Character, Maithilī and Devanāgarī. White paper. Lines, 16 on a page. Letters, 56 in a line. Folia, 19. 11×4¾ inches. Appearance, old. Prose and verse. Complete Generally correct. Date? Place of deposit, Babu Bhagīratha Thākura, Sajhuar, P. O. Bahera, Darbhanga. A commentary on Kuṇḍamaṇḍapasiddhi by the author. Slightly damaged.

Beginning, End, Colophon and विषय :—Same.

(C) कुण्डमण्डपसिद्धिव्याख्या by विट्ठलदीक्षित ॥
Kuṇḍamaṇḍapasiddhivyākhyā.

Substance .—Character, Maithilī. White paper. Lines, 7 on a page. Letters, 38 in a line. Folia, 27. 9½×4½ inches. Appearance, tolerable. Prose and verse. Complete. Generally correct. Date, Śaka 1774. Place of deposit, Pandit Devakṛṣṇa Jhā, Chanaur, P. O. Manigachi, Darbhanga.

Beginning, End, Colophon and विषय :—Same.

Post Colophon :—वेदसप्तनगभूमितशाके चैत्रे मासि सिते बुधवारे ।
शंकरपादयुगं हृदि ध्यात्वा चालिखत्सिद्धिकुण्डमण्डपम् ।
पुरेश्वलवरे रम्ये राजमन्दिरशोभिते ।

(D) कुण्डमण्डपसिद्धिव्याख्या by विट्ठलदीक्षित ॥
Kuṇḍamaṇḍapasiddhivyākhyā.

Substance :—Character, Maithilī. White paper. Lines, 11 on a page. Letters, 49 in a line. Folia, 14. 12×4½ inches. Appearance, old. Prose. Worm-eaten. Damaged. Incomplete

Generally correct. Date? Place of deposit, Pandit Gonū Miśra, Lalaganj, P. O. Jhanjharpur, Darbhanga.

Beginning, विषय :—Same, **End, Colophon** :—Wanting.

No. 32. कुशकण्डिकाभाष्यम् by रामलाल ॥ Kuśakaṇḍikābhāṣyam.

Substance:—Character, Maithilī. Brown paper. Lines, 9 on a page. Letters, 38 in a line. Folia, 17. 11×4½ inches. Appearance, fresh. Prose and verse. Complete. Generally correct. Date, Śaka 1825. Place of deposit, Pandit Baladeva Jhā, Chainpur, P. O. Bariahi, Bhagalpur.

Beginning :—श्री गणेशाय नमः ॥ अथ कुशकण्डीव्याख्या लिख्यते ॥
यां विना सच्चिदानन्दो न विष्णो विश्वयेश्वरः ।
इच्छाज्ञानक्रियाशक्तिं वन्दे तच्छक्तिमम्बिकाम् ॥ १ ॥
ख्यातं रायपुरेति नाम नगरं संसेवितं धार्मिकै-
र्विज्ञस्तत्र वसन्तसिंहनृपतिः श्रीकृष्णसिंहात्मजः ।
त्राता दीनजनस्य नीतिनिपुणो विप्रप्रियो धार्मिकः
तन्मान्यः खलु रामलालविबुधो धर्मोपदेष्टा नृणाम् ॥ २ ॥
तेनायं रचितः प्रमोदजनको विद्वज्जनानां सदा
ग्रन्थः कर्मविधायकोतिशुभदः कण्डीप्रकाशार्थकः ॥ ३ ॥

End :—
ऋषिश्छन्दो दैवतञ्च विनियोगमनुक्रमात् ।
अस्मृत्वाप्यर्थादिकं विप्रो जपेद्वा जुहुयादपि ॥
यजेदध्यापयेद्वापि न लभेत्कर्मणां फलमिति दोषश्रवणात् ।
तथा नामाभिधानन्तु न करोति विमूढधीः ।
वृथा तस्य भवेद्यस्य सर्वं कर्मविदो विदुः ॥

Colophon :— इति कुशकण्डिकाभाष्यं समाप्तम् ॥

Post Colophon :—बाणेषुबाणेभेन्दुमितेविशाके रुद्राननेदूग्मिलिते सनेऽब्दे ।
वलक्षपक्षे बलदेवशर्मालिखद्दशम्यां तुलगे शनौ वै ॥
ग्रामे मुङ्गेरे निजशिष्यगेहे पीताम्बरीपादयुगम्बिभाव्य ॥१॥
विषय :—स्थण्डिलादिप्रमाणनिरूपणम् ॥

No. 33. केनोपनिषत् ॥ Kenopanisat.

Substance:—Character, Devanāgarī. White paper. Lines, 9 on a page. Letters, 50 in a line. Folia, 2. 13×5 inches. Appearance, fair. Prose. Complete. Generally correct. Date ? Place of deposit, Pandit Bhaie Pāṭhaka, Karion, P. O. Ballipur, Darbhanga.

Beginning :—श्रीगणेशाय नमः ॥ ओं केनेषितं पतति केन प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ॥१॥ केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥२॥ श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः ॥३॥ चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति न तत्र चक्षुर्गच्छति न वाग्गच्छति ॥४॥ नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात् । अन्यदेव तद्विदितादथो अविदिता-दधि ॥५॥

End :— अथाध्यात्मं यदेतद्गच्छतीव च मनोनेन चैतदुपस्मरत्यभीक्ष्णं संकल्पस्तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभिहैनं सर्वाणि भूतानि संवाञ्छन्त्युपनिषदं भो ब्रूहीत्युक्तवा त उपनिषत् ब्राह्मीं वा वत उपनिषदमब्रूमेति तस्यै तपो दम. कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम्॥ यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥

Colophon :— इति केनोपनिषत्समाप्ता ॥ सामवेदे तलवकारशाखायाम् ॥ श्रीगणेशाय नमः ॥ श्रीविश्वेश्वराय नमः ॥

Previous Notice :—C. C. Pt. I. P. 125. Pt. II. P. 24 195. Pt. III. P. 27. Ady. P. 164. C. P. B. P. 99. C. S. C. Vol. X. P. 526. H. P. S. Cat. No. 1308. B. S. C. P. 692.642 C.M. P. 106. Tan. Vol. II. P. 642. 1397.

No. 34. केनोपनिषद्भाष्यम् by शङ्कराचार्य ॥ Kenopanisadbhāsyam.

Substance:—Character, Devanāgarī. White paper. Lines, 1C on a page. Letters, 48 in a line. Folia, 18, 13×5 inches Appearance, fair. Prose. Complete. Incorrect. Date, Samvat 1883. Place of deposit, Pandit Bhaie Pāthaka, Karion P. O. Ballipur, Darbhanga. A commentary on Kenopanisat of Tavalkāra—Śākhā by Śankarāchārya.

Beginning :—श्रीगणेशाय नमः ॥ ओं केनेषितमित्याद्योपनिषत्परब्रह्मविषया वक्तव्येति नवमस्याध्यायस्यारंभः ॥ प्रागेतस्मात्कर्माण्यशेषतः परिसमाप्तानि समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्युक्तानि कर्माङ्गसामविषयाणि चानंतरं च गायत्रसामविषयदर्शनं वंशान्तमुक्तं कार्यं। सर्वमेतद्यथोक्तं कर्म च ज्ञानञ्च सम्यगनुष्ठितं निःकामस्य मुमुक्षोः सत्वशुद्ध्यर्थं भवति॥सकामस्य तु ज्ञानरहितस्य केवलानि श्रौतानि स्मार्त्तानि च कर्माणि दक्षिणमार्गप्रतिपत्तये पुनरावृत्तये च भवन्ति। स्वाभाविक्या स्वशास्त्रीयया प्रवृत्या पश्वादिस्थावरान्ताऽधोगतिः स्यात्॥

End :— अनन्त इति।विशेषणान्न त्रिविष्टपेऽनन्तशब्द औपचारिकोपि स्यादित्यत आह। ज्येये इति ज्येये ज्यायसि। सर्वमहत्तरे स्व आत्मनि मुख्य एव प्रतितिष्ठति न पुनः संसारमापद्यत इत्यभिप्रायः॥

Colophon :— इति गोविन्दभगवत्पादपूज्यशिष्यस्य परमहंसपरिव्राजकस्य श्रीमच्छङ्करभगवतः कृतौ तवल्कारशाखाकेनोपनिषद्भाष्यं समाप्तम्॥

Post Colophon:— श्रीमद्रामानन्दसरस्वतिपूज्यपादशिष्यरामकृष्णानन्दसरस्वति-
लिखितम् संवत् १८८३ मिति भादुवदि एकादशी सोमवार ॥
विषयः॥केनोपनिषद्विवरणम् ॥

Previous Notice—C. C. Pt I. P. 125. Pt. II. P. 24. 195. Pt. III. P. 27. Ady. P. 165. C. P. B. P. 99. C. S. C. Vol. X. P. 526. H. P. S. Cat. No. 1308. B. S. C. P. 663. Tan. Vol. III. P. 954.

No. 35. केनोपनिषद्भाष्यविवरणम् ॥ Kenopanisadbhāsyavivaranam.

Substance.—Character, Devanāgarī. White paper. Lines, 11 on a page. Letters, 46 in a line. Folia, 29.14×7 inches. Appearance, old. Prose. Incomplete. Incorrect. Date, Samvat 1923. Place of deposit, Pandit Rādhākānta Jhā, Mahesapur. P. O Tajpur, Darbhanga. A commentary on Kenopanisadbhāsya of Śaṅkarāchārya. Anonymous. Slightly damaged condition.

Beginning—ओं केनेषितम्पतति प्रेषितं मनः।केन प्राणः प्रथमः प्रैति युक्तः केने-
षितां वाचमिमां वदन्ति चक्षु. श्रोत्रं क उ देवो युनक्ति ॥

Beginning of Bhāsya:—ओं तत्सत् । समासं कर्मात्मभूतप्राणविषयं विज्ञानं
कर्म चानेकप्रकारम् । ययोर्विकल्पसमुच्चयानुष्ठानाद्दक्षिणोत्तराभ्यां
सृतिभ्यामावृत्यनावृत्ती भवतः ॥

Beginning of Commentary on Bhāsya:—ओं तत्सत् ॥
प्रयत्नाद्यन्तरेणैव मनआदेः प्रवर्त्तकम् ।
विदिताविदितान्यत्वसिद्धं ब्रह्माहमद्वयम् ॥
केनेषितमित्यादिकां सामवेदशाखाभेदब्राह्मणोपनिषदं पदशो
व्याख्याया: पि न तुतोष भगवान् भाष्यकारः । शारीरकैर्न्यायैरनि-
र्णीतार्थत्वार्थत्वादिति न्यायप्रधानैः ॥ श्रुत्यर्थसंग्राहकैर्वाक्यैर्व्याचि-

ख्यासु: पूर्वकाण्डेन संबन्धमभिधित्सु: पूर्वकाण्डार्थं संक्षेपतो दर्शयति । समाप्तमिति ॥

End of Text:—तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनं यो वा एतामेवं वेद । अप इत्यपाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति इति चतुर्थखण्डः ॥

End of Bhāṣya:—अनन्ते अपारे अविद्यमानान्ते स्वर्गे लोके सुखप्राये निर्दु.खात्मनि परे ब्रह्मणि ज्येये महति सर्वमहत्तरे प्रतितिष्ठति सर्ववेदान्तवेद्यं ब्रह्मात्मत्वेनावगम्य तदेव ब्रह्म प्रतिपद्यत इत्यर्थः ॥

End of Commentary on Bhāsya:—

सत्यकाम: स्वयं सिद्ध: सर्वेशो यः स्वशक्तित: ।
स एवान्त: प्रविष्टोहमुपास्य. सर्वदेहिनाम् ॥

Colophon :— इति सामवेदतलवकारशाखोक्तकेनोपनिषत्समाप्त. ।

Colophon of Bhāsya :—इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्य श्रीमच्छंकरभगवत: कृतौ केनोपनिषद्वाक्यविवरणं समाप्तम् ॥

Colophon of Commentary on Bhāsya:—इति केनेषितवाक्यभाष्यटिप्पणी समाप्तम् ॥ पौ० शु० १३ सं० १८२३ लि० नन्दराम ॥

Previous Notice·—C. C. Pt. I. P. 125. Pt. II. P. 24 Pt. III. P. 27. Ady. P. 165. C. P. B. P. 99. C. S. C. Vol. X P. 526. H. P. S. Cat. No. 1308. B. S. C. P. 663. Tan. Vol. III P. 954.

(A) केनोपनिषद्भाष्यविवरणम् ॥ Kenopanisadbhāsyavivaraṇam.

Substance:—Character, Devanāgarī. White paper. Lines, 17 on a page. Letters, 42 in a line. Folia, 29. 13×6 inches.

Appearance, tolerable. Prose. Complete. Incorrect. Date ? Pace of deposit, Raj Library, Darbhanga. A commentary on Bhāṣya of Śankarāchārya. Anonymous.

Beginning, End, Colophon, विषय :— same.

(B) केनोपनिषद्भाष्यविवरणम् ॥ Kenopanisadbhāsyavivaraṇam.

Substance:—Character, Devanāgari. White paper. Lines, 16 on a page. Letters, 47 in a line. Folia, 21. 13×6½ inches. Appearance, tolerable. Prose. Complete. Incorrect Date ? Place of deposit, Raj Library, Darbhanga. A commentary on the Bhāṣya of Śankarāchārya on Kenopanisat. Anonymous.

Beginning, End, Colophon, विषय same.

No. 36. कैवल्योपनिषत् ॥ Kaivalyopanisat.

Substance:—Character, Maithilī. White paper. Lines, 6 on a page. Letters, 32 in a line. Folia, 7. 9×3½ inches. Appearance, old. Prose and verse. Complete. Generally correct. Date ? Place of deposit, Pandit Rādhākant Pāṭhaka, Mujauna, P. O. Waini, Darbhanga. Slightly damaged condition.

Beginning. ओं नमो ब्रह्मणे कैवल्यदात्रे नमः ॥
ओं सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्विनावधी-
तमस्तु मा विद्विषावहै ओं शान्तिः शान्तिः शान्तिः ॥ अथा-
श्वलायनो भगवन्तं परमेष्ठिनं परिसमेत्योवाच । अधीहि भगवन्
ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् । ययाचिरात्सर्व-
पापं ह्यपोह्य परात्परं पुरुषमुपैति विद्वान् ॥
तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवेहि ।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥

End :— यः शतरुद्रीयमधीते सोऽग्निपूतो भवति सुवर्णस्तेयात्पूतो भवति ब्रह्महत्यात्पूतो भवति सुरापानात्पूतो भवति। कृत्याकृत्यात्पूतो भवति। अत्याश्रमी सकृद्वा जपेत् अनेन ज्ञानमाप्नोति संसारार्णवतारकम्। तस्मादेवं विदित्वैनं कैवल्यं पदमश्नुते इत्याह भगवान्बौधायनः॥ शन्न इन्द्राग्नी भवतामवोभिः शन्न इन्द्रावरुणावातहव्या शमिन्द्रासोमासविताय शंय्यो शन्न इन्द्रापूषणावाजसातौ॥ ओं शान्तिः शान्तिः शान्तिः॥ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै तेजस्विनावधीतमस्तु मा विद्विषावहै॥ ओं शान्तिः शान्तिः शान्तिः। ओं सदाशिवाय कैवल्यदात्रे नमः॥ ०॥

Colophon.— इति कैवल्योपनिषत्॥

Previous Notice: C. C. Pt. I. P, 129. Pt. II. P. 25, 195. Pt. III. P. 28. Ady. P. 166. C. P. B. P. 101. B. S. C. P. 630, 642, 669. C. M. P. 106. H. P. S. Cat. No. 1748. Tan. Vol. II. P. 703, 1399. Tri. Cat. Vol. III. Pt. I. (C.) P. 4170.

No. 37. कैवल्योपनिषद्दीपिका by शङ्करानन्द॥ Kaivalyopanisaddīpikā.

Substance.—Character, Devanāgarī. White paper. Lines, 14 on a page. Letters, 50 in a line. Folia, 6. 13×6 inches Appearance, old. Prose. Complete Incorrect. Date ? Place of deposit, Pandit Bhaie Pāthaka, Karıon, P. O. Ballipur, Darbhanga, A commentary on Kaivalyopanısat by Śaṅkarānanda.

Beginning :— ओं श्रीगणेशाय नमः॥

कैवल्याख्योपनिषदं कैवल्यार्थावबोधिनीम्॥
व्याख्यास्ये केवलस्तेन कैवल्यात्मा प्रसीदतु॥१॥
भगवती श्रुतिर्मातेव सुखप्रतिपत्त्यर्थं कश्रनाश्वलायनमुररीकृत्याख्या-

यिकामवतारयति ब्रह्मविद्यायामास्तिकां जनयितुमथेति । अथ साधन-चतुष्टयसंपत्त्यनन्तरं आश्वलायनः ऋग्वेदाचार्यः भगवन्तं प्रजावन्तं परमेष्ठिनं सर्वोत्कृष्टस्थाननिवासं परिसमेत्य शास्त्रीयेण विधिना समीपमागत्य उवाच उक्तवान् ।

End :— एवं विदित्वा उक्तेन प्रकारेण त्रिनेत्रध्यानं रुद्राध्यायाध्यापनादिना विदित्वा साक्षात्कृत्य एवं परमात्मानं कैवल्यं केवलस्यात्मनो भावः कैवल्यं तत्फलं पुरुषाभिलाषविषयसर्वपुरुषार्थसमाप्तिभूतं अश्नुते प्राप्नोति कैवल्यं फलमश्नुते व्याख्यातं पदाभ्यास उपनिषदर्थपरिसमाप्त्यर्थः॥ २ त्रिवशाखोक्तउपनिषत्कैवल्यदीपिका ॥

Colophon : — इतिश्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य शंकरानन्दभगवतः कृतौ कैवल्योपनिषद्दीपिका समाप्तम् ॥

विषयः । कैवल्योपनिषट्टीका ॥

Previous Notice · C. C. Pt. I. P. 129. Pt. II. P. 25 Pt. III. P. 28 Ady. P. 166 B. S. C.670, 690. H. P. S. Cat. No. 1756, 1759. Tan. Vol. III. P 962-64. Tri. Cat. Vol. II Pt. IA. P. 6267.

(A) कैवल्योपनिषद्दीपिका । Kaivalyopaniṣaddīpikā.

Substance: Character, Maithilī. White paper. Lines, 14 on a page. Letters, 55 in a line. Folia, 5. 11×4 inches Appearance, old Prose and Verse. Complete. Incorrect. Date ? Place of deposit, Pandit Kamalādatta Jhā, Mahisi, P. O. Bariahi, Bhagalpur. A commentary on Kaivalyopanisat of Atharvaveda by Śaṅkarānanda. The Ms. contains text also. Slightly damaged condition.

Beginning, **End**, **Colophon**, विषय:— same.

No. 38. कौशिकसूत्रम् by कौशिक ॥ Kausikasūtram.

Substance:—Character, Maithilī and Devanāgarī. White paper. Lines, 12 on a page. Letters, 20 in a line. Folia, 9.8×6 inches. Appearance, fresh. Prose in Sūtra form. Complete. Correct. Date ? Place of deposit, Pt. M. M. Parameshwara Jhā, Tarauni, P. O. Sakri, Darbhanga. A manual of Veda dealing with Gṛhyavidhāna. Book form.

Beginning:— ओं नमोऽथर्ववेदाय॥अथ विधिं वक्ष्यामः॥स पुनराम्नाय: प्रत्यय आम्नाय पुनर्वंशश्च ब्राह्मणानि च।तद्यथा ब्राह्मणविधिरेवं कर्मलिङ्गा मन्त्रास्तथान्यार्थास्तथा ब्राह्मणलिङ्गा मन्त्रास्तदभावे सम्प्रदायः प्रयुक्तत्वाद्ब्राह्मणानां यज्ञं व्याख्यास्यामो देवानां पितॄणाञ्च etc. ॥

End:— ओं बृहस्पतिप्रसूतः करवाणीत्यनुज्ञाप्य सवितृप्रसूतः कुरुतां भवानित्य-नुज्ञातः कुर्वीत। पूर्वया कुर्वीतेति युवा कौशिको युवा कौशिकः ॥८।

Colophon:— इति कौशिके प्रथमोध्यायः समाप्तः ॥
विषयः । अथर्ववेदीयगृह्यकर्मविधानक्रमबोधकः॥

Previous Notice:—C. C. Pt. I. P. 131. Pt. II. P. 26-195. Pt. III. P. 28. C. M. Vol. I. P. V. P. 79. B. S. C. P. 23.

No. 39. क्रमकारिका ॥ Kramakārikā.

Substance:—Character, Maithilī. White paper. Lines, 13 on a page. Letters, 56 in a line. Folia, 4. 13½×4½ inches. Appearance, fair. Verse. Complete. Incorrect. Date ? Place of deposit, Pandit Kunjabihārī Jhā, Maubehat, P. O. Putai, Darbhanga. Anonymous. It deal with the recitation of the hymns of white-yajurveda. Worm-eaten. Slightly damaged.

Beginning:— श्री गणेशाय नमः॥

प्रणम्याचन्दिनमणिं योगीश्वरशिरोमणिम्।
सर्वज्ञं याज्ञवल्क्यन्तच्छिष्यं कात्यायनं मुनिम् ॥१॥
सर्वयजुषमन्त्राणां वेदे वाजसनेयके।
क्रमावसानविषयां कारिकामारभामहे ॥२॥
श्लोके विन्द्वादिविरहः प्रतीकेषु न दुःसहः।
प्रत्येकम्प्रथमापष्ठी सप्तम्युक्रम्प्रकल्पते ॥३॥
पदानामनुपूर्वेर्ण क्रम एषः प्रवर्त्तते।
गणान्तानां क्रमो नास्ति इति कात्यायनोब्रवीत् ॥४॥

End.— यावतीत्यनुवाकेस्य न्त्विषः सवृगथान्तवृत्।
स्वाहाप्राणानुवाकानामष्टानामनुवाकवृत् ॥
आयासाय युगैकत्वं यमायन्त्वन्तवेष्टनः।
ईशावास्यमिद० सर्वं द्विवेष्टयं सर्वसम्मतम् ॥

Colophon:— इति क्रमकारिका समाप्ता ॥
विषयः। शुक्लयजुर्वेदाध्ययनक्रमनिरूपणम् ॥

Previous Notice:—C. C. Pt. I. P. 132.

————

(A) क्रमकारिका। Kramakārikā.

Substance:—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 50 in a line. Folia, 4. 15×4 inches. Appearance, tolerable. Verse. Complete. Incorrect. Date ? Place of deposit, Pandit Brajamohana Jhā, Nanaur, P. O. Tamuria, Darbhanga.

Beginning, End, Colophon, विषय:— Same.

————

No. 40. गङ्गोपनिषत् ॥ Gangopanisat.

Substance :—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 34 in a line. Folia, 2. 11×4½ inches. Appearance, old. Prose. Complete. Incorrect. Date ? Place of deposit, Pandit Bhuvaneśvara Jhā, Harinagar, P. O. Sumbhā Deorhi, Darbhanga. Worn out. Very much damaged. Worm-eaten.

Beginning :— अथ गङ्गोपनिषत् । यां देवा देवसवितं पितरश्च पर्युपासते । यामृषयस्ता नो देवसरिद्देवानां पापं हन्तु धर्मसवित्रीम् ॥ यां मूर्ध्नि धत्त ईशानोऽमृतत्वाय शितिकण्ठः पुरातनः । तामहं देवीमुपासये मातेव सा मामवतु महतोऽवद्यात् । यामृषयः स्तुतिभिः स्तुवन्ति विश्वेदेवा अथ गन्धर्वा वैष्णवी सा मे नदीश्वरी ददातु तेजस्तामहं प्रपद्ये लोकरात्रीं । नमस्ते देवसरिन्मातर्नमस्ते अस्तु त्रिपथगे । नमस्ते अस्तु ब्रह्मवरदे विष्णुपादार्घसंभूते नमो मात्रे देवि मन्दाकिन्यै पृथिव्यां गंगायै अथो भगवत्यै भवभूत्यै भूतानामस्तु तुभ्यम् ।

End :— महापापं हन्त्यतिपापं हन्त्युपपापं न याति स्वर्गन्न याति ब्रह्मलोकं न याति सत्यलोकं ददाति धनन्ददाति कामन्ददात्याह भगवान्वादरायणः । य इमाम्विद्यामधीते तरति हत्यां तरति स्तेयं तरति पारदारिकत्वं लभतेऽभिमतं सर्वमधीयानो मासमेकमिति ॥

Colophon .— इति गंगोपनिषत्समाप्ता ।

Previous notice ·—C. C. Pt. I. P. 140. R. M. 1926.

(A) गङ्गोपनिषत् Gangopanisat.

Substance :— Character, Maithilī. White paper. Lines, 11 on a page. Letters, 45 in a line. Folio, 1. 11×4½ inches.

Appearance, tolerable. Prose. Complete. Incorrect. Date, San 1274 Sāl. Place of deposit, Pandit Śrīnandana Miśra, Kanhauli, P. O. Sakri, Darbhanga.

Beginning, End, Colophon, विषय :— Same.

No. 41. गणेशाथर्वशीर्षम् ॥ Gaṇesātharvaśirsam.

Substance..—Character, Maithilī. white paper. Lines, 6 on a page. Letters, 52 in a line. Folia, 2. 13×4 inches. Appearance, fair. Prose. Complete. Generally correct. Date? Place of deposit, Pandit Keśava Jhā, Harinagar, P. O. Sumbhā Deorhi, Darbhanga.

Beginning :— ओंनमो गणेशाय ॥ अथ गणेशाथर्वशीर्षं व्याख्यास्यामः ॥ ओं नमोस्तु गणपतये त्वमेव प्रत्यक्षं तत्वमसि त्वमेव केवलं कर्त्तासि त्वमेव केवलं धर्त्तासि अव त्वं मां त्वमेव केवलं हर्त्तासि त्वमेव सर्वं खल्विदं ब्रह्मासि त्वं साक्षादात्मासि नित्यं ऋतं वच्मि सत्यं वच्मि अव त्वम्मां अवतु वक्तारं तन्मामवतु तद्वक्तारमवतु अवतु मां अवतु वक्तारं अव श्रोतारं अव दातारं अव धातारं अवानूचानम शिष्यं अव पश्चात्तात् अव पुरस्तात्तात् अवोत्तरात्तात् अव दक्षिणात्तात् अव चोर्ध्वात्तात् अवाधरात्तात् सर्वतो मां पाहि पाहि समन्तात् ॥

End :— यो मोदकसहस्रेण यजति स वाञ्छितफलमवाप्नोति यः साज्यसमिद्भिर्यजति स सर्वं लभते स सर्वं लभते अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा सूर्यवर्चस्वी भवति । सूर्यगृहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा सिद्धमन्त्रो भवति महाविघ्नात्प्रमुच्यते महादोषात्प्रमुच्यते स सर्वविद्भवति स सर्वविद्भवति य एवं वेद ॥ इत्युपनिषत् ॥ ओं शान्तिः ओं शान्तिः ओं शान्ति. ॥

वृश्चिक ते विषं मा विभेर्मा मरिष्यसि परित्वापासि सर्वत: घनेन
हन्मि वृश्चिकमहं दण्डेनागतं ।
आदित्यरथवेगेन विष्णुबाहुबळेन च ।
गरुडपक्षनिपातेन भूमिं गच्छ महायशाः ॥
गरुडस्य पक्षमात्रेण त्रयो देवाः प्रकम्पिताः ।
प्रकम्पिता मही सर्वा सशैलवनकानना ॥
ओं सशैलवनकानना इति ॥ ओं शान्तिः । ओं शान्तिः । ओं
शान्तिः ॥ ओं शान्तिरस्तु ॥

Colophon :— इति गरुडोपनिषत् समाप्तम् ॥ ओं नमो गरुडाय ॥
विषय: । कुशेन गरुडपक्षेण वा सम्मार्जनात्सर्पादिविषनाशः ॥

Previous notice.—C. C. Pt. I. P. 150. Pt. II. P.30. 196. Pt. III. P. 32. Ady. P. 174. C. P. B. P. 120. H. P. S. P. 1432. B. S. C. P. 610. C. M. P. 107. Tan. Vol. II. P. 845. Vol. III. P. 1408. Tri. Cat. Vol. V. Pt. 1-C., P. 6670.

No. 43. गर्भोपनिषत् । Garbhopanisat.

Substance:—Character, Devanāgarī. White paper. Lines, 9 an a page. Letters, 50 in a line. Folia, 2. 13½ × 5½ inches. Appearance, tair. Prose and verse. Complete. Incorrect. Date? Place of deposit, pandit Bhaie Pāṭhaka, Karion, P. O. Ballipur, Darbhanga.

Beginning :— ओं पञ्चात्मकं पञ्चसुवर्त्तमानं षडाश्रयं षड्गुणयोगयुक्तम् ।
तत्सप्तधातुं त्रिमलं द्वियोनिं चतुर्विधाहारमयं शरीरम् ॥
पञ्चात्मकं कस्मात्पृथिव्यप्तेजोवायुराकाशमित्यस्मिन्पञ्चात्मके शरीरे
का पृथिवी का आप: किन्तेज: को वायु: किमाकाशं तत्र यत्कठि-
नं सा पृथिवी यद्द्रवं ता आपो यदुष्णं तत्तेजो यत्संचरति स वायु-
र्यत्सुषिरं तदाकाशम् ।

End :— कर्मेन्द्रियाणि यज्ञपात्राणि हवींषि शिर: कपालं केशा दर्भा मुखेन्त-वेंदिश्चतु:कपाळं शिर: षोडशपार्श्वदन्तोष्ठपटलानि सप्तोत्तरं मर्मशतं साशीतिकं संधिशतं सनवकं स्नायुशतं सप्तशिरा: शतानि पञ्च मज्जा शतान्यस्थीनि च ह वै त्रीणि शतानि षष्टिश्चार्धचतस्रो रोमाणि कोट्यो हृदयपलान्यष्टौ द्वादशपलानि जिह्वा पित्तप्रस्थं कफस्याढकं शुक्रे कुडवं मेद:प्रस्थौ द्वावनियतं मूत्रपुरीषमाहारपरिमाणा त्पैप्पलादं मोक्षशास्त्रं परिसमाप्तं पैप्पलादं मोक्षशास्त्रमिति ॥

Colophon :— इत्यथर्ववेदे गर्भोपनिषत्संपूर्णा अष्टम: ॥

Previous Notice:—C. C. Pt. I. P. 151. Pt. II. P. 30. 196. pt. III. P. 32. C. M. P. 107. B. S. C. P. 608. Tan. Vol. II. P. 716. Tri. Cat. Vol. III.Pt. 1A. P. 2812.

No. 44. गर्भोपनिषद्दीपिका by शंकरानन्द ॥ Garbhopaniṣaddīpikā.

Substance:—Character, Devanāgarī. White paper. Lines, 9 on a page. Letters, 54 in a line. Folia, 11. $13\frac{1}{2} \times 5\frac{1}{2}$ inches. Appearance, fair. Prose. Complete. Generally correct. Date ? Place of deposit, Pandit Bhaie Pāṭhaka, Karion, P.O. Ballipur, Darbhanga. A commentary on Garbhopanisat by Śaṅkarānanda.

Beginning :— ओं श्री गणेशाय नम: ॥

ओं संसारदुर्वैतरणीनिमग्नान्निरीक्ष्य सर्वान्बहुधास्मदादीन् ।
मातेव पुत्रान्घृणया श्रुतिर्न. प्राहेदमत्र त्यजताभिमानम् ॥ १ ॥
गर्भोपनिषदो व्याख्यां करिष्येऽस्मिंच्छरीरके ।
अहं बुद्धिहरी तस्या: कारणं तुष्यताद्धर: ॥ २ ॥
सर्वोपनिषदां संबन्धादिचतुष्टयस्य साधारण्यान्न पृथक् वर्णनीयं ।
अत्र तु सत्यप्युनिषत्साधारण्ये शरीरके वैराग्यं विशेषत: प्रतिपाद्यते ॥

ततः शरीरमेवोररीकृत्याह पंचात्मकं पञ्चपृथिव्यप्तेजोवाय्वाकाशा आत्मानः स्वरूपमुपादानं वा यस्य तत्पञ्चात्मकं पञ्चसु शब्दस्पर्श रूपरसगन्धेषु ॥

End :— इदानींमस्य शास्त्रस्य मन्त्रमूत्रादिपरित्यागमाभिधायित्वेनानादेयत्वं प्राप्तं वारयति पैप्पलादं । पिप्पलादेन स्वशिष्यान्मोक्षकामिनः । प्रत्युक्तं पैप्पलादं मोक्षशास्त्रं मोक्षस्याविद्यादिनिवृत्तिरूपस्य हि तस्य शासनान्मोक्षशास्त्रं परिसमाप्तं सर्वतः समाप्तिं गतं पैप्पलादं मोक्षशास्त्रं परिसमाप्तं व्याख्यात वाक्याभ्यास उपनिषत्समाप्त्यर्थः ॥

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशंकरानन्दभगवतः कृतौ गर्भोपनिषद्दीपिका समाप्तम् ॥

विषय :—गर्भोपनिषद्व्याख्यानम् ॥

Previous notice:—C. C. Pt. I. 151. Pt. III. P. 32. Tan Vol. III. P. 966.

No. 45. गायत्रीतत्त्वम् ॥ Gāyatrītattvam.

Substance:—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 32 in a line. Folia, 2. 8½×3½ inches. Appearance, fair. Prose and Verse. Complete. Generally correct. Date ? Place of deposit, Babu Sahadeva Pāṭhaka, Karnpur, P. O. Sukpur, Bhagalpur. An extract from Vedasāra in praise of Gāyatrī.

Beginning :— श्रीगणेशाय नमः अथ गायत्रीतत्त्वप्रारम्भः ॥ श्रीगायत्र्यै नमः ॥ श्रीगायत्रीतत्त्वमालामन्त्रस्य विश्वामित्र ऋषिः अनुष्टुप्छन्दः परमात्मा देवता हलो बीजानि स्वराः शक्तयः अव्यक्तं कीलकं मम समस्तपापक्षयार्थे गायत्रीतत्त्वपाठे विनियोगः ॥

चतुर्विंशतितत्त्वानां यदेकं तत्त्वमुत्तमम् ।
अनुपाधिपरं ब्रह्म तत्परं ज्योतिरोमिति ॥ १ ॥
यो वेदादौ स्वर: प्रोक्तो वेदान्ते च प्रतिष्ठित:
तस्य प्रकृतिलीनस्य तत्परं ज्योतिरोमिति ॥ २ ॥
तत्सदादिपदैर्वाच्यं परम पदमव्ययम् ।
अभेदत्वं पदार्थस्य तत्परं ज्योतिरोमिति ॥ ३ ॥

End :— यं यं काममभिध्यायति तन्तमेवाप्नोति पुत्रपौत्रान् कीर्त्तिसौभाग्यांश्चोपलभाते । सर्वभूतात्समभित्रो देहान्ते तद्विशिष्टो गायत्रीपरमं पदमवाप्नोति ।

Colophon :— इति श्रीवेदसारे गायत्रीतत्वं संपूर्णम् ।। समाप्तम् ॥ यदक्षरेत्यादि ॥ शुभं भूयात् ॥

विषय:। गायत्रीस्तव:॥

No. 46. गायत्रीहृदयम् ॥ Gāyatrīhṛdayam.

Substance:— Character, Maithilī. Yellow paper. Lines, 6 on a page. Letters, 22 in a line. Folia, 18. $6\frac{1}{2} \times 2\frac{3}{4}$ inches. Appearance, old. Hymns and prose. Complete. Incorrect. Date? Place of deposit, Babu Visvanātha Pāṭhaka, Mahisi, P. O. Bariahi, Bhagalpur. An extract from Taittirīya Śākhā of Yajurveda. Very much damaged.

Beginning :— ओंकारस्य ब्रह्माऋषिर्गायत्रीच्छन्दस्सविता देवता शुक्लो वर्णस्तद वयवस्याकारस्य श्वेतमुकारस्य पीतं मकारस्य लोहितं रूपं पृथ्वी स्वरूपं चक्षु:कृतपापनाश: फलं सर्वकर्मारम्भे विनियोग. । तकारस्य प्रल्हादऋषिर्गायत्रीछन्दोग्निर्देवता सुमुखं मुद्रा प्रह्लादिनी

शक्तिश्चरूपकवर्णो पृथिवीतत्त्वं ब्रह्महत्यादिपापनाशः फलं केशवनाम-
पादाङ्गुष्ठे ओं तं नमः ॥

End :— अनेन गायत्रीहृदयेनाधीतेन क्रतुशतेनेष्टवान्भवति गायत्र्याः षष्टिलक्ष-
जपफलं लभेत् । अष्टौ ब्राह्मणान् सम्यक् ग्राहयित्वा ब्रह्मलोके महीयते
इदन्नित्यमधीयानो ब्राह्मणः प्रयतः शुचिः ।
सर्वपापैर्विमुक्तोसौ ब्रह्मलोके महीयते ॥
इत्याह भगवान् ब्रह्मा याज्ञवल्क्यमुनिम्प्रति ॥

Colophon :— इति यजुर्वेदे तैत्तिरीयशाखायां गायत्रीहृदयं संपूर्णम् ॥

No. 47. गृह्यकारिका by रेणुक ॥ Gṛhyakārikā ।

Substance:—Character, Devanāgarī. White paper. Lines, 10 on a page. Letters, 34 in a line. Folia, 129. 11×4½ inches. Appearance, fresh. Verse. Complete. Incorrect. Date, Saṁvat 1936. Place of deposit, Raj Library, Darbhanga.

Beginning :— श्री गणेशाय नमः॥
मखादिकर्मविज्ञानकुमुदोद्बोधहेतवे ।
नमस्तस्मै गणेशांघ्रिः नत्वा चंद्रमरीचये ॥१॥
इतीष्टभक्तिस्मृतिबुद्धिलज्जाशान्त्यादियोषिद्वरवल्लभोहं ।
ब्रवीमि संस्कारविधिं निषेकान् ब्राह्मं प्रणम्याब्जजमवांघ्रिपद्मम् ॥२॥
संस्कारो द्विविधः प्रोक्तो ब्राह्मो दैवो मनीषिभिः ।
गर्भाधानादिको ब्राह्मो दैविकः पाकयज्ञियः ॥३॥
गर्भाधानमृतौ कार्यं पुत्रस्योत्पत्तिहेतवे ।
नास्त्यपुत्रस्य लोकोसावतस्तस्य च नित्यता ।
गर्भाधानाङ्गभूतत्वाहतुः प्रागभिधीयते ॥

End :— आसीच्छांडिल्यवंशजो द्विजवरः सौजन्यजन्माकृतिः।
श्रीसोमेश्वरदीक्षितोंबुजभवात्यात्मजः षट्पदः॥
सच्छास्त्रार्थमहोदधेर्निरवधेर्वेदग्ध्यदुग्धाम्बुधे।
श्रीमाध्यन्दिनधर्मदुर्धरधरोद्धारैकधुर्यस्ततः॥
सूनुस्तत्कुलपद्मखण्डनयनः श्रीमान्महेशाभिधः।
सूरिर्भूरियशाः श्रुतिस्मृतिसदाचारैकनिष्ठो भवेत्॥
तत्सूनुः कति सूनुसूत्रतटिनीकल्लोलनक्रोमदा-
स्तेनेयं रचिता प्रयोगविवृतिः श्रीरेणुकार्येण वै॥
अब्दे क्षयाख्ये मधुसंज्ञमासि शार्के च वस्वीश्वरसंमिताङ्के।
ग्रन्थः कृतोयं कमलालयांघ्रिसरोरुहामादितु षट्पदेन॥
यदुत्क्रममनुक्रम्वा यच्चोक्रमसमञ्जसम्।
तदत्र निपुणैः सम्यग्विधातव्यं समञ्जसम्॥

Colophon :— इति गृह्यकारिकासमाप्तम् संवत् १९३६ ज्येष्ठकृष्णत्रयोदशसोमवारे शुभं भूयात्॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते॥
शुभमस्तु॥ श्रीरस्तु॥ ६॥

विषयः। गर्भाधानम्। पुंसवनम्। सीमन्तोन्नयनम्। जातकम। नामकरणम्। निष्क्रमणम्। कर्णवेधः। अन्नप्राशनम्। चूडाकरणम्। उपनयनम्। वेदारम्भः। उपाकर्म। उत्सर्गविधिः। अनध्यायः। समावर्तनम्। स्नातकधर्माः। विवाहः। चतुर्थीकर्म। वधूप्रवेशः। शालाकर्म। लाङ्गलयोजनसीतायज्ञप्रकरणम्। भैषज्यकर्म। अशौचप्रकरणम्। अवकीर्णप्रायश्चित्तम्। सभाप्रवेशनम्। रथारोहणम्। हस्त्यारोहणादि॥

Previous Notice :—C. C. Pt. I. P. 158, 334. Pt. III. P. 34. H. P. S. Cat. No. 1135-37.

(A) गृह्यकारिका by रेणुक ॥ Gṛhyakārikā.

Substance:—Character, Maithilī. White paper. Lines, 8-10 on a page. Letters, 58 in a line. Folia, 100. 14×4½ inches. Appearance, fresh. Prose. Complete. Incorrect. Date? Place of deposit, Pandit Sītārāma Pāṭhaka, Karnpur, P. O. Sukpur, Bhagalpur. End differs.

End:— लिङ्गादाप्यायते शेष इति सूत्रविदां मतम् ।
इति तत्वार्थसंपूर्णा रेणुकार्येण यज्वना ॥
कृतायां सूत्रविवृतौ समाप्ता गृह्यकारिका ॥ २७ ॥

Beginning, Colophon, विषय :— Same.

No. 48. गृह्यकारिका by गोभिल •Gṛhyakārikā.

Substance:—Character, Maithilī. Yellow paper. Lines, 9 on a page. Letters, 54 in a line. Folia, 10. 13×5 inches. Appearance, fair. Verse. Incomplete. Incorrect. Date? Place of deposit, Pandit Suvaṁśalāla Jhā, Sukpur, P. O. Sukpur, Bhagalpur. (Resident of Bara, adjacent to Pachgachia)

Beginning:— श्री गणेशाय नमः
अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम् ।
अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् ॥ १ ॥
त्रिवृदूर्ध्ववृतं कार्यं तन्तुत्रयमधोवृतम् ।
त्रिवृत्तश्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ॥ २ ॥
पृष्ठवंशे च नाभ्याञ्च धृतं यद्विन्दते कटि ।
तद्धार्यमुपवीतं स्यान्नातो लम्बं न चोच्छ्रितम् ॥ ३ ॥
सदोपवीतिना भाव्यं सदा बद्धशिखेन च ।
विशेषो ह्युपवीतश्च यत्करोति न तत्कृतम् ॥ ४ ॥

End of Ms. :—गृहदाहाग्निनाग्निस्तु यष्टव्यः चममवो द्विजैः ।
दावाग्निनाथ संसर्गे हृदयं यदि तप्यते ।
द्विभूतो यदि संसृज्येत् संसृष्टमुपसामयेत् ।
असंसृष्टजागरयेक्षिरिग्नमेव युक्तवान् ॥
नखे नखे प्रावत्यहोमः स्यान्मुच्ये... ॥

Colophon :—wanting.

विषयः । गोभिलोक्तानां कर्मणां तदनिर्दिष्टानामन्येषामपि सामवेदिनामुपयुक्तविषयाणां निरूपणम् ॥

No. 49. गृह्यसूत्रम् by गोभिल ॥ Gṛhyasūtram.

Substance:—Character, Maithilī. Yellow paper. Lines, 8 on a page. Letters, 53 in a line. Folia, 23. 13×4⅝ inches. Appearance, tolerable. Sūtras in prose form. Complete in 4 chapters. Incorrect. Date? Place of deposit, Pandit Sureśa Miśra, Saurath, P. O. Madhubani, Darbhanga.

Beginning :—श्रीगणेशाय नमः ॥ गोभिलाचार्याय नमः ॥ अथातो गृह्यकर्माण्युपदेक्ष्यामो यज्ञोपवीतिनाचान्तोदकेन कृत्यमुदगयने पूर्वपक्षे पुण्येऽहनि प्रागावर्तनादहःकालं विद्याद्यथादेशश्च सर्वाण्येवान्वाहार्य्यवन्त्यपवर्गेभिरूपभोजनं यथाशक्ति ब्रह्मचारी वेदमधीत्यान्त्यांसभिधमभ्याधास्यं जायाया पाणिं जिघृक्षन्ननुगुप्ता. अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमुह्योपलिप्य मध्यतः प्राचीं लेखामुल्लिख्योदीचीञ्च संहतां पश्चान्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेल्लक्षणावृदेषा सर्वत्र ॥

End:— गौरिति नापितः त्रिः ब्रूयान्मुञ्च गां वरुणपाद्द्विषन्तम् यथेहीति तस्या यह्मम् ष्य चोभयोरुत्सृज्य गामत्त तृणानि पिवतूदकमिति ब्रूयान्नात रुद्राणामित्यनुमन्त्रयेतान्यत्र यज्ञात् कुरुतेत्यधियज्ञं षडर्घ्यार्हाभिवन्त्याचार्यं ऋत्विक्स्नातको राजा विवाह्यः प्रियोतिथिरिति प्रतिसंवत्सरानर्हयेत्पुनर्यज्ञविवाहयोश्च ॥ १० ॥

Colophon :— इति चतुर्थः प्रपाठकः ॥ इति गोभिलसूत्रं समाप्तम् ॥

विषयः । छन्दोगानां दशकर्मविधानम् ॥

Previous Notice:—C. C. Pt. I. P. 158, 164. Pt. II. P. 33. 198. Pt. III. P. 35. C. P. B. P. 133. B. M. (1908) P. 186. H. P. S. Cat. No. 1347. B. S. C. P. 105. C. M. P. 73.

(A) गृह्यसूत्रम् by गोभिल ॥ Gṛhyasūtram.

Substance:—Character, Maithilī. White paper. Lines, 12 on a page. Letters, 50 in a line. Folia, 15. 12x5 inches. Appearance, new. Complete. Generally correct. Date ? Place of deposit, Pandit Maṇīśvara Jhā, Lalganj, P. O. Jhanjharpur, Darbhanga.

Beginning, End, Colophon, विषय :— Same.

No. 50. गृह्यसूत्रभाष्यम् by नारायण ॥ Gṛhyasūtrabhāṣyam.

Substance:—Character, Devanāgarī. White and yellow paper. Lines, 10 on a page. Letters, 41 in a line. Folia, 120. 12×4½ inches. Appearance, new. Prose. Incomplete. Incorrect. Date ? Place of deposit, Pandit Maṇīśwara jhā, Lalganj, P.O. Jhanjharpur, Darbhanga. A commentary on Gṛhyasūtra of Gobhila by Nārāyaṇa.

Beginning :—श्रीसरस्वत्यै नमः ॥

आसीने चन्द्रमौळौ नगपतिसुतया साकमुद्वाहकाळे ।
कर्तुं या मङ्गलार्थं तिलकमुपगता भ्रान्तहस्ता ललाटे ॥
मीते शोषं स्मरारेर्नयनहुतभुजा चन्दने जातहासा ।

सा देवी विश्ववन्द्या दिशतु शुभविधौ मङ्गलं मङ्गला वः ॥१॥
विश्वस्य कारणं विष्णुं प्रणम्य क्रियते मया ।
गृह्याख्यायाःस्मृतेर्भाष्यं विवेकार्थममेधसाम् ॥ २ ॥

End :—Wanting.

Colophon:— इति श्रीनारायणविरचिते गोभिलीयगृह्यभाष्ये चतुर्थस्य दशमी कण्डिका समाप्ता ।१० । इति चतुर्थः प्रपाठकः समाप्तः । ४ । इति नारायणभाष्यं संपूर्णं । ॥ ३॥ श्रीरस्तु ।
विषयः । नारायणप्रणीतगोभिलगृह्यसूत्रव्याख्या ।

Previous Notice :— C. C. Pt. I. P. 158, 164. Pt. II. P. 198. Pt, III. P. 35. R. M. Pt. V. P. 288. A. C. Pt. I. P. 36. H. P. S. Cat. No. 1350, B. S. C. P. 38.

(A) गृह्यसूत्रभाष्यम् by नारायण । Gṛhyasūtrabhāsyam.

Substance :—Character, Maithilī. White paper. Lines, 10 on a page. Letters, 46 in a line. Folia, 28. 13×5½ inches. Appearance, tolerable. Prose. Incomplete. Correct. Date ? Place of deposit, Raj Library, Darbhanga. A commentary on Gobhilagṛhyasūtra. This Ms. contains 2 Adhyāyas complete and first pāda of the 3rd Adhyāya.

Beginning, विषय :—Same ; End, Colophon:-wanting.

No. 51. गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance :—Character, Maithilī and Devanāgarī. White paper. Lines, 7 on a page. Letters, 34 in a line. Folia, 48. 11×4 inches. Appearance, fair. Prose. Complete. Generally correct. Date ? Place of deposit, Pandit Rādhākānta Pāthaka, Mujauna, P. O. Waini, Darbhanga.

Beginning :—ॐ नमो महागणेशाय ॥ अथ गृह्यसूत्रम् ॥ अथातो गृह्यस्थालीपाकानां कर्म । परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्यग्नि कुर्यात्स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववदुपयमनान्कुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः ॥ १ ॥

End :— वाचात्वापिदधामि वाचात्वापि दधामि तिष्ठ प्रतिष्ठ स्वरकरणकंठ्यौरस दन्त्यैघोमेधामाधुर्यं ग्रहणधारणोच्चारणशक्तिर्मयि भवतु आप्यायन्तु मेङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशो बलम् यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तिष्ठतु ॥ १६ ॥

Colophon :—इति श्रीगृह्यसूत्रे त्रितीयं काण्डं समाप्तम् । इति पारस्कराचार्यकृतं माध्यन्दिनीशाखासंबन्धिनं गृह्यसूत्रम् समाप्तम् शुभमस्तु ॥
विषयः । वाजसनेयिनां दशकर्मविधानम् ॥

Previous Notice:—C. C. Pt. I. P. 158 334. Pt. II. 74, 210. Pt. III. P. 71. R. M. Pt. V. P. 87. C. M. P. 39. C. P. B. P. 133. 272. H. P. S. Cat. No. 1013. B. S. C. P. 42.

(A) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance :—Character, Maithilī. White paper. Lines, 8 on a page. Letters, 32 in a line. Falia, 40. 11×4½ inches. Appearance, old. Prose. Complete. Incorrect. Date, San 1240 Sāl. Place of deposit, Pandit Rāmacharana Jhā, Maubehat, P. O. Putai, Darbhanga. Worn out. Very much damaged.

Beginning, End, Colophon, विषय .— Same.

(B) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Devanāgarī. White and yellow paper. Lines, 7 on a page. Letters, 36 in a line. Folia, 44. 11×4½ inches. Appearance, old. Prose. Complete. Incorrect. Date, Saṁvat 1925. Place of deposit, Pandit Jaṭādhara Jhā, Madhupur, P. O. Kamtaul, Darbhanga.

Beginning, End, Colophon, विषय:— Same.

(C) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Maithilī. White paper. Lines, 8 on a page. Letters, 48 in a line. Folia, 32, 11×3½ inches. Appearance, old. Prose. Complete. Incorrect. Date, ? Place of deposit, Pandit Jaṭādhara Jhā, Madhupur, P. O. Kamataul, Darbhanga. Worn out. Very much damaged.

Beginning, End, Colophon, विषय:—Same.

(D) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Devanāgarī. White paper. Lines, 9 on a page. Letters, 36 in a line. Folia, 32. 11×5½ inches. Appearance, fair. Prose. Complete. Generally correct. Date, Saṁvat 1922. Place of deposit, Babu Bachana Ṭhākur, Karnpur, P. O. Sukpur, Bhagalpur

Beginning, End, Colophon, विषय:—Same.

(E) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Maithilī. White paper. Lines, 80 on a page. Letters, 62 in a line. Folia, 21, 13⅜×4¾ inches. Appearance, fair. Prose (Hymns). Complete. Incorrect. Date? Place of deposit, Babu Kamalanārāyaṇa Jhā, Chainpur, P. O. Bariahi, Bhagalpur.

Beginning, End, Colophon, विषय:—Same.

(F) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Maithilī. Nepalī paper. Lines, 10 on page. Letters, 34 in a line. Folia, 33. 10½×4½ inches. Appearance, tolerable. Hymns. Complete. Correct. Date? Place of deposit, Pandit Rāghava Jhā, Andauli, P. O. Madhavapur, Darbhanga.

Beginning, End, Colophon, विषय:—Same.

(G) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram

Substance:—Character, Maithilī. Dark-white paper. lines, 9 on a page. Letters, 38 in a line. Folia, 32. 10×3 inches. Prose in Sūtra form. Appearance, old. Worn out. Place of deposit, Pandit Vāsudeva Misra, Salampur, P. O. Ghataho, Darbhanga. Date, Saka 1511. Complete. Generally correct.

Beginning, End, Colophon, विषय:—Same.

Post Colophon:—शाके १५११ माघशुदिद्वितीयायां लिखितमिदं गृह्यसूत्रं विष्णुपतिना स्वपाठार्थमिति ॥

(H) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance :— Character, Maithilī. White paper. Lines, 7 on a page. Letters, 38 in a line. Folia, 51. 8½×3½ inches. Appearance, new. Prose. Complete. Incorrect. Date? Place of deposit, Pandit Ādyānātha Misra, Pahitol, P. O. Manigachi, Darbhanga.

Beginning, End, Colophon, विषय :— Same.

(I) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:—Character, Maithilī. White paper. Lines, 7 on a page. Letters, 32 in a line. Folia, 59. 9×4 inches. Appearance, old. Prose. Complete. Generally correct. Date, San 1247 Sāl. Place of deposit, Pandit Bikal Jhā, Lalganj, P. O. Jhanjharpur, Darbhanga.

Beginning, End, Colophon, विषय :—Same.

(J) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūram.

Substance :—Character, Devanāgarī. White paper. Lines, 8 on a page. Letters, 25 in a line. Folia, 54. 17×4¾ inches Appearance, new. Prose. Complete. Incorrect. Date, Śaka 1778. Place of deposit, Pandit Sadānanda Jhā, P. O. Andhra-tharhi, Darbhanga.

Beginning, End, Colophon, विषय:—Same.

Post Colophon:—संवत् १६१६ शाके १७७८ इदं पुस्तकं लिपिकृतं पांचाल्येन ॥

(K) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtraṃ.

Substance:— Character, Maithilī. Palm leaves, Lines, 6 on a page. Letters, 56 in a line. Folia, 35. 14×2 inches. Appearance, old. Hymns, Complete. Correct. Date, La. Sam. 441 and Śaka 1488. Place of deposit, Pandit Premadhara Jhā, Ujana, P. O. Jhanjharpur, Darbhanga. Worn out. Worm-eaten.

Beginning, End, Colophon, विषय:— Same.

Post Colophon: लस ४४१ शाके १४८८ भाद्रशुक्लदशम्यां रवौ निचिताग्रामे श्रीराम देवेन स्वार्थं लिखितमिदं पुस्तकमिति ॥ बहुधा बहुभ्य: श्रुत्वा नाना-प्रकारेण च हरिहरकर्कवासुदेवरेणुदीक्षितविष्णुवाजपेयिप्रणीतान्-व्याख्यानग्रन्थानालोक्य हलायुधमन्त्रमुरारिप्रभृतीन् मन्त्रव्याख्यान-ग्रन्थांश्चालोक्य विचार्य द्वैधे युक्त्या गुरूपदेशेन च निश्चित्य लिखित-मिदमतो नात्र पाठान्यथाभावशङ्का कार्या तत्त्वजिज्ञासुभिरिति ॥ अनु-पदेशेन पुस्तकमात्रेण सदुपदेशेन वा योऽभ्यास: स सर्वथा परित्याज्य इति ॥ राम ॥

(L) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Maithilī and Devanāgarī. White paper. Lines, 8 on a page. Letters, 38 in a line. Folia, 42. 11×4¾ inches. Appearance, old. Prose. Complete. Incorrect. Place of deposit, Pandit Babuana Jhā, Maubehat, P. O. Putai, Darbhanga. Slightly damaged.

Beginning, End, Colophon, विषय:— Same.

(M) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance :—Character, Maithilī White paper. Lines, 13 on a page. Letters, 44 in a line. Folia, 23. 9½×4 inches. Appearance, new. Complete. Generally correct. Date, Śaka 1786. Place of deposit, Pandit Govardhana Jhā, Balia, P. O. Sakri, Darbhanga. Differs in the end.

Beginning, Colophon, विषय :—Same.

End :— अथ प्राङ्मुखमासीनं सोमान्यं कर्त्तारं ब्राह्मणाः सपल्लवा दर्भपाणय. शान्तिभिः पवित्रलिङ्गाभिःऋग्भिः सिंचेयुः पुरन्ध्रयो नीराजनादिमङ्गलानि कुर्वन्ति मङ्गलानि कुर्वन्तीति ॥ १२ ॥

Post Colophon :—संवत् १९२१ शाके १७८६ सन् १२७२ साल
माघे मास्यसिते पक्षे एकादश्यां विधोर्दिने ।
गृह्यसूत्रं हि लिखितं नित्यानन्देन धीमता ॥
श्रीमंगपातु ॥

(N) गृह्यसूत्रम् by पारस्कर ॥ Gṛhyasūtram.

Substance:— Character, Devanāgarī. White paper. Lines, 9 on a page. Letters, 50 in a line. Folia, 10. 11×4½ inches. Appearance, fresh, Prose. Incomplete. Incorrect. Date, Saṁvat 1931. Place of deposit, Pandit M. M. Rājinātha Misra, Saurath, P. O. Madhubani, Darbhanga.

Beginning, विषय :—Same.

End :— प्रकृतादन्यस्माद्वाज्यशेषेण च पूर्ववद्बलिकर्मक्षिपश्चो यजेरन्नाचरितृत्वास्तस्थिते कर्मणि ब्राह्मणान् भोजयेरस्थिते कर्मणि ब्राह्मणान् भोजयेत् ॥ २० ॥

